कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥ त्रिकंडिकासूत्रभाष्येदं पुस्तकं लेयं ॥

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1439
Dist Nagpur

Acc. No. - ~~84~~ M1439.
Title - त्रिकाण्डिका : सटीका (संपूर्ण)
टी. स्नानदीपिका (भाष्य)
Author - कात्यायन (?)
टी. - कर्कोपाध्याय
Date - ?
Sub - वेदांग.
folio - 36
Xerox - 67

श्रीगणेशाय नमः॥ स्मृत्वा सोमेश्वरं देवं नत्वा कात्यायनं मुनिं॥ सर्वेषा
मुपकाराय क्रियते स्नानदीपिका १ अन्यैरपि ग्रंथकारैः कृतो वै स्नानवि
स्तरः॥ तथाप्यंतर्गतः सोमः प्रेरयेत्येव शंकरः २ अथातो नित्यस्नानं वि
धास्यत इति सूत्रशेषः॥ ॥अथेति श्रौतस्मार्तक्रियानुविधानानां नंतर्य
माह॥ अतो हेत्वर्थः॥ यतस्ताः क्रियाः स्नानपूर्विकाः॥ अतो हेतोः स्नान
विधानमावश्यकं विधास्यत इति शिष्यबुद्धिसमाधानार्थं प्रतिज्ञाकरणं॥
काम्यनैमित्तिकस्नानव्युदासार्थं नित्यशब्दोपादानं॥ तयोर्जलावगाहनयोग्यत्वे
सत्यपि निसेषि स्नानविधेर्निषेधः॥ विशेषविधिसत्वात्॥ स्नानमि

१

तिविधिना बहिः सर्वांगजलसंयोगः॥ तथा च शंखः॥ अस्नातस्तु
पुमान्नार्हो जप्याग्निहवनादिषु॥ प्रातस्नानं तदर्थं वै नित्यस्नानं प्रकी
र्तितं॥ पुष्यस्नानादिकं स्नानं दैवज्ञविधिनोदितं॥ तद्धि काम्यं समु
द्दिष्टं नाकामस्तत्प्रयोजयेत्॥ स्मृतिसारे॥ ग्रहणोद्वाहसंक्रांतौ यात्रा
र्तिप्रसवेषु च॥ स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यत इति॥ इदं चिकं
डिकासूत्रं मध्यान्हस्नानंपरं॥ यतः प्रातःस्नानं तिलहीनं॥ अत्र तु
कात्यायनाचार्यैस्तिलाहरणमुक्तं॥ अतः मध्यान्हपरमेवेति॥ तथा च
स्मृतिसमुच्चये॥ प्रातःस्नाने न कर्त्तव्यं कदाचित्तिलतर्पणं॥ शौनको
पि॥

3

प्रातःस्नाने विशेषोयं तद्धि नैव तिलैर्युतं ॥ नैमित्तिकं च नित्यं च तिलैरे
व विधीयत इति ॥ अन्यच्च ॥ यथाहनि तथा प्रातर्नित्यं स्नायादनातुर इति
वचनात्प्रातः स्नानेप्यस्य विधेः प्राप्तौ स्वयमेव साग्निकानां प्रातः
स्नाने विस्तरनिषेधमपि वदंति कात्यायनचरणाः ॥ अल्पत्वात् होम
कालस्य बहुत्वात्स्नानकर्मणः ॥ प्रातर्न तनुयात्स्नानं होमलोपो हि ग
र्हित इति ॥ व्यासोपि ॥ प्रातः संक्षेपतः स्नानं शौचं कुर्यात दिष्यते ॥ विधि
मंत्रसमायुक्तं मध्याह्ने तु सविस्तरमिति ॥ द्वितीयव्याख्या सूत्रस्य ॥ अ
थशब्दो मंगलार्थः ॥ तथाचोक्तं ॥ ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः

२

पुरा॥ कंठंभीत्वाविनियतोनस्मान्मांगल्लिकाद्युभाविति॥ युक्तं
चैतत्॥ कथमन्यथासदाचारापरंपरापरिप्राप्तकर्तव्यताकस्य
मंगलस्यनित्यस्नानविधिंप्रणयतोमहामुनेर्मंगलानाचरणंसंभा
व्यते॥ किंच॥ मंगलेसतिसमाप्तेरावश्यकत्वमित्येवसमाप्तिप्रति
मंगलस्यकारणता॥ नदुक्तं॥ श्रौतात्सांगात्फलावश्यंभावनियमा
दिति॥ हित्वर्थश्चातः शङ्कः॥ यतः आवश्यकंअतोहेतोः नित्यस्नानं
मध्यान्हस्नानंविधाश्यत् इति तातं॥ नित्यत्वादनंगमपिनिर्वहणीयं
तथाचकात्यायनः॥ नित्येनैमित्तिकेकुर्यात्प्रसवायजिघांसया॥ यथा

शक्तस्तथा कुर्यान्नैव सफलं भवेदिति ॥ नित्यस्नानविधावनधिका
रिणमाह स्मृतिः ॥ न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ॥ न वासो
भिः सहाजस्रं नाविज्ञाते जलाशय इति ॥ भोजनासंभवात् तांबूलादिभक्ष
णप्रतिषेधः ॥ इक्षुरापः फलं मूलं तांबूलं पयमौषधं ॥ भक्षयित्वापि
कुर्वीत स्नानदानादिकाः क्रिया इति स्मृतिरशक्तिविषया ॥ मनुः स्ना
नार्हस्तु निमित्तेन कृत्वा तोयावगाहनं ॥ आचम्य प्रयतः पश्चात्स्नानं
विधिवदाचरेदिति ॥ अस्पृश्यस्पर्शादिनिमित्तेनेत्यर्थः ॥ स्नानं कुत्र क
र्तव्यमित्यपेक्षामाह ॥ नद्यादौ ॥ नदिः आदिः प्रथमा मुख्या यस्य स्ना

नाधिकारः पाजञ्जाद्यायं स्यात्सोन याद्दिः तस्मिन्॥ अकृत्रिमेषु जलाश
येस्वा यादिति यावत्॥ तथा च स्मृतिः॥ नदीसरिद्देवखातगर्तप्रस्रवणे
षु च॥ सरित्स्वाकृत्रिमेषु शस्तं तीर्थे विशेषतः॥ बहुतोयासु वापीषु
कूपेष्वपि कदाचनेति मरीचिः॥ तत्र नदी अशोषसलिलास्रवन्ती॥ स
रित्पुराणप्रसिद्धा॥ देवनिर्मितत्वेन प्रसिद्धो देवखातः॥ गर्तो योजन
भूभागपर्याप्तजलप्रवाहः॥ प्रस्रवणं पर्वतादेः॥ स्वतः प्रवृत्तो निर्झरः
सरः उत्तराकदंडखातादिः॥ तीर्थं पुराणप्रसिद्धं॥ अत्रिः॥ अलाभे
देवखातानां ह्रदानां सरितां तथा॥ उद्धृत्य चतुरः पिंडान्पारक्ये स्नान

मा वे दि ति ७

7

पारक्यमिति अनुस्रष्टं जलं ॥ पंचपिंडानुद्धृत्येति व्यासः सप्तमुद्धृ
तियोगी ॥ दशेति शौनकः ॥ शक्त्यानुसारेणैव व्यवस्था ॥ स्कांदे ॥ अ
स नुद्धृत्य तु यः स्कन्दुरैनं स्यात्तुरीयभाक् ॥ स्मृतिस्तु ॥ शाल्मलितिनी
पीनिंबकरंजश्च हरीतकी ॥ कोविदारकपित्थार्कबदर्येरंडशिग्रवः ॥
शेलुश्च खदिरश्चैषां स्नानं छायासु वर्जयेत् ॥ अग्राह्यास्वागाताह्या
पोनघाः प्रथमवेगतः ॥ अक्षोभिता स्तुकेनापि याश्च तीर्थाद्विभिः स
ताः ॥ प्रथालेपा च्युते तोये न स्नायात्तु कदाचन ॥ अमेध्यं न द्विजाना
पातीला चांद्रायणं चरेत् ॥ इति व्यासः ॥ तीर्थेपि नाकुले स्त्रीभिर्ना

८

सज्जनसमाश्रिते ॥ स्नायादिति विशेषः ॥ कात्यायनः ॥ याः शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि ॥ तासु प्रावृषि न स्नायाद पूर्णे दशवासरे ॥ याज्ञवल्क्यस्तु ॥ रजोदुष्टे नस्मिस्नानवर्जनयादिषु द्विजैः ॥ कदर्थितं रूजस्ताषां संध्योपास्तिश्च तर्पणं ॥ महानदीव्यतिरिक्तु विषयमिदं वचः ॥ तथा व्याघ्रपादः ॥ सिंहकर्कटयोर्मध्ये सर्वानिद्योरजस्वलाः ॥ त्रिदिनं तु चतुर्थेन्हि शुद्धास्युर्जान्हवी यथा ॥ उपाकर्मादावदोषः ॥ तथा च वशिष्ठः ॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥ इत्यादि ॥ वस्त्रनि

९

यममप्याह मेधातिथिः॥ केनवाससास्नानं द्वाभ्यामपिवस्मृतं॥ बहु
भिः प्रतिषेधः स्यात्स्नाने फलमभीप्सितः॥ वशिष्ठस्तु॥ नादशि
केनवस्त्रेण स्नायात्कौपीनका वृत्ते॥ नान्यादीयेन नार्द्रेन स्रूव्याग्र
पितेरवेति॥ एवंस्नानाधिकरणमुक्त्वेदानीं स्नानोपकरणाहरण
माह॥ मृद्गोमयकुशातिलसुमनस आहृताः॥ मृद मर्दने मृद्यतइति
मृत्॥ गोः पुरीष इति मयट्॥ कौ शेरत इति कुशाः॥ तिल स्नेहे। तिलं
ति स्निह्यंतीति तिलाः॥ सुष्ठु मन्यंते ताः सुमनसः॥ मृच्च गोमयं
च कुशाश्च तिलाश्च सुमनसश्च मृद्गोमपकुशातिलसुमनसस्ताः

आहृत्य स्वयमानीय अभूद्दक्षिण्यादिना वा आनयेत्॥ तथा च शं-
खः॥ समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्॥ शूद्रानीतैः क्र-
यक्रीतैः कर्म कुर्वन्व्रजत्यधः इति॥ अशक्तो न्यायार्जितधनैः क्रीता-
न्यपि गृह्णीयात्॥ महाजनगृहीतत्वात्॥ तथा विष्णुधर्मोत्तरे॥ ध-
मार्जितधनक्रीतैर्यः कुर्याद्देवतार्चनं॥ उद्धरिष्यत्यसंदेहं स सप्त पूर्वा-
न्तथा परान्॥ इति॥ तत्र नदीकूलादिषु विदेशस्थामृदम्॥ जीर्णखा-
दिदोषरहितायाः गोर्गोमयं तिलक्षेत्रादिषु विदेशसंभवान्कुशा-
न्॥ ग्राम्यानारण्यान्वा तिलान्॥ सुरभीणि पुष्पाणि बिल्वतुलसीपत्र

11

ति पत्राणि च ॥ वस्त्रयुग्मोदपात्रादीन् यथादाय स्नानौषधी गृहीत्वा तु ॥ अग्रहणे दो
षश्रवणाच्च ॥ तथा चोक्तं स्मृतिसारे ॥ यदि स्नातो द्विजस्तीर्थाद गृहीत्वा कमंडलुं ॥
स्नातो नादूरमागच्छेत् स्नानं तस्य वृथा भवेत् ॥ इति ॥ आर्द्र धौत विमुक्तमाधौ
तवासो युगं तथेति ॥ जाबालिः ॥ यमः ॥ आहरेन्मृत्तिकां प्रातः कूपतः सरितां तथा ॥
वापीकूपतडागेभ्यो नाहरेद्वाल्यतो मृदं ॥ नाहरेज्जलमध्यस्थां परतो मृणि बधनान् ॥
शातातपश्च ॥ शुचिदेशात्तु संग्राह्या शर्करादिविवर्जिता ॥ दक्षस्तु ॥ मृत्तिका सप्त
न ग्राह्या वल्मिकान्मूषकस्थलात् ॥ अंतर्जलाच्च मार्गाच्च वृक्षमूलात्सुरालयात् ॥
परशौचावशिष्टाच्च श्रेयस्कामैः सदा बुधैरिति ॥ स्मृतिसारे ॥ अत्यंतजीर्णदेहाया

वंध्यायाश्च विशेषतः ॥ रोगार्त्तानैव सूतायाः न घोमेभियमाहरेत् ॥ शातातपः ॥ मृत्तिकां गोमयं चापि
न निशायां समाहरेत् ॥ कूर्मपुराणे ॥ मृत्तिका च समुद्दिष्टा आर्द्रामलकमात्रका ॥ गोमयस्य प्रमा
णं तु येनांगं लेपयेत्ततः इति ॥ कात्यायनः ॥ शुचौ देशे शुचिर्भूत्वा विप्रपूर्वेन्निरामुखः ॥ ॐकारे
णैव मंत्रेण सद्धरेद्वसुशान्त्यरोतत् ॥ विरंचिना समुत्पन्ना परमेष्ठी निसर्गजा ॥ नुद सर्वाणि पापा
नि भवस्त्वस्मिन्कृतानि मम ॥ कुं फट् इत्युत्सारयेत् ॥ योगी ॥ मृत्तिका गोमयं दर्भा पुष्पाणि सुरभीणि च ॥
आहरेत्स्नानकाले तु स्नानार्थं प्रयतः शुचिः ॥ स्मृतिसारे ॥ एकेन करवीरेण रक्तेनाप्यसितेन वा ॥
हरं हरिं वा संपूज्य न भूय स्तनपो भवेत् ॥ इत्यादि ॥ एवं स्नानोपकरणाहरणमुक्त्वेदानीं जलसमी
पगमनपूर्वकं स्नानेतिकर्तव्यतामाह ॥ उदकांतं गत्वा शुचौ देशे स्थापय ॥ उंदी क्लेदने ॥ उंदतीत्युदकं
उदकस्यान्तोवधिः संबंधिनोंतं समीपं यत्स्थलं तदासाद्य ॥ एकांतमुदकं गत्वा तीरं प्रक्षाल्य पाणिना ॥
तत्र संस्थापयेत्सर्वं यथादेशं पृथक्पृथक् ॥ गीनिवनात्तत्रापद्रव्यनिरसनपूर्वकं प्रक्षालिते शुचौ देशे

13

भूमौ मृदादानि स्थाप्य दक्षिणहस्तेन निधाय अत्र समासाद्येपि चात्म वादेशाभ्यादसः ॥ छंदव
त्सूत्राणीति वचनात् ॥ स्कांदे ॥ अपां समीपमासाद्य नित्यं कर्म समाचरेदिति ॥ प्रक्षाल्य
पाणिपादं ॥ प्रकर्षेण मज्जलाभ्यां क्षालयित्वा किं पाणिपादं ॥ पण्यते याभ्यां पाणी ॥ प
द्यंते याभ्यां पादौ ॥ इणप्य औरच्छिः ॥ प्राणि सूर्य सेनांगानामिति सूत्रेणैकवद्भावं समा
हारद्वन्द्वः ॥ पाणी च पादौ च पाणिपादं ॥ अत्र ध्यंतत्वात्स्वल्पाच्तरत्वाच्च पाण्योः पूर्वनिपा
तः ॥ तेनोपविश्य प्राल पार्श्वे दक्षिणपार्दौ सक्रमं पादौ प्रक्षाल्य पाणि प्रक्षालयेत्
न तु पादक्रमेण ॥ तदुक्तं ॥ प्रक्षाल्य पादौ हस्तौ च पिबेन्नत्वा समारभेत् ॥ एतत्पादप्रक्षा
लनमुद्धृतजलेन कुर्यात् ॥ तदुक्तं बोधायनेन ॥ आपादेव गृहे गोष्ठे द्विजालयं निर्णि
क्तपादः प्रविशेदिति ॥ कात्यायनः ॥ तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः आमनसी

नेम कर्त्तव्यं न प्रश्नेननति स्तोति ॥ प्रश्नः किंचिदूर्ध्वः ॥ कुशोपग्रहे तु बद्धशिखी यज्ञोपवीत्याचम्य ॥
कुशाः सव्यहस्तउपग्रहो धर्मो येन सौ कुशोपग्रहः सर्वत्रोपग्रहः ॥ पवित्रमप्युपलक्ष्यति ॥
तथा च व्यासः ॥ सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रक इति ॥ सुमंतुः ॥ समूलाग्रौ विवस्त्व
तु कुशौ द्वौ दक्षिणे करे ॥ सव्ये चैव तथा त्रींश्च बिभृयात्सर्वकर्मसु ॥ कात्यायनः ॥ स्नाने होमे त
था दाने स्वाध्याये पितृतर्पणे ॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा ॥ शंखलिखितः ॥ ब्रह्मयज्ञे
जपे चैव ब्रह्मग्रंथिर्विधीयते ॥ भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते ॥ त्रिगुणीकृतरज्जु
तु त्रिरत्नामान्निया जयेत् ॥ ब्रह्मग्रंथिः स विज्ञेयः सदा मौंज्यादिकर्मसु ॥ मूलपर्वणि कु
र्वाणो मलत्वाहीयते क्रिया ॥ मध्यपर्वणि कुर्वाणः पुत्रदारैर्वियुज्यते ॥ अनामिकाग्रपर्वस्थं पवि
त्रं बिभृयात्सदा ॥ हारीतः ॥ चतुर्भिर्दर्भपिंजूलैः पवित्रं ब्राह्मणस्य तु ॥ एकैकं ह्रासयेन्नतु वर्णव
र्णे यथाक्रमं ॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रथितं न वेति ॥ तथा सव्यापसव्यौ कुर्वीत सपवित्रौ करौ
यतः ॥

15

ग्रंथियस्य पवित्रस्य न तेनाचमनं चरेत् इति संग्रहे ॥ ग्रंथियुक्तपवित्रेण समाचमति यो द्वि
जः ॥ विसृज्य तत्पवित्रं तु पुनराचम्य शुध्यति ॥ स्मृत्यंतरे ॥ न ब्रह्मग्रंथिना चामेन्न दूर्वा
भिः कदाचनेति ॥ अन्यच्च ॥ हारीतः ॥ वामहस्ते कुशान्धृत्वा समाचमति यो द्विजः ॥ उ
पस्पृष्टं भवेत्तेन रुधिरेण मलेन वेति ॥ कात्यायनः ॥ सपवित्रः सदर्भो वा कर्मांगाचम
नं चरेत् ॥ नोच्छिष्टं तत्सदर्भं भुक्तोच्छिष्टं तु वर्जयेत् ॥ शौनकोपि ॥ पवित्रं तु नाशौ स
यमाचांते पि कदाचन ॥ पितॄणां तर्पणे त्याज्यं भोजने च विशेषतः इत्यादि ॥ कुशोपग्रहसन्न
बद्धा सो बद्धशिखा चूडा सा यस्यास्तीति बद्धशिखी ॥ सव्यस्कंधस्थितयज्ञोपवीतित्व
मकुर्यादित्यर्थः ॥ तथाश्वलायनः ॥ उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैरिति ॥ बद्धशिखी
यज्ञोपवीतित्वस्मरणं सावधानीकरणार्थं ॥ केशप्रसारणात्से विशिखत्वप्राप्तेः ॥ तथाच स्मृतिसारः
नग्नां बाकच्छितेरोप्य त्रयमग्रंथी न मस्तके ॥ भोजनं मैथुनं मंत्रं कुर्वन् [illegible] शुध्यति ॥

गोभिलः ॥ अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोपि वा ॥ विना यज्ञोपवीतेन आचांतोप्यशुचिर्भवेत् ॥
इति ॥ पठन्मंत्रेण दक्षिणपार्श्वे किमंगि शिखैकदेशाबंधनमुच्यते ॥ व्यासः ॥ स्मृत्वोंकारं तु गायत्रीं निब
ध्नीयाच्छिखां द्विज इति ॥ स्मृत्यंतरे ॥ अष्टोत्तरशतं कोशाम् गायत्र्याश्च प्रयत्नतः ॥ शिखाबंधे प्रबंध्ये
वं ततः कर्मसमारभेदिति ॥ चतुर्विंशतिमतात् ॥ मानस्तोके इति मंत्रेण शिखाबंधनमाचरेत् ॥ जप
एव हि विप्राणां रक्षाकर्म विवर्जनादिति ॥ जपपरमेव ॥ मुक्तकेशो न कुर्वीतेति वचनात्तु ह्रस्वां जुटि
कामपि बध्नीयात् ॥ प्रशस्तं यज्ञोपवीतं यस्यास्तीति यज्ञोपवीती ॥ प्राशस्त्यं तु क्षालनाद्भवति ।
न त्वकंठे कृत्वा ॥ अत्र भृगुः ॥ कायस्थमेव प्रक्षाल्यमुत्तार्यं न कदाचन ॥ सकृदुत्तारणे नास्य प्राय
श्चित्तं भवेद्द्विज इति ॥ पुनर्मंत्रेण धारणमेव प्रायश्चित्तं ॥ तथा चोक्तं ॥ मंत्रन्यस्तोपवीतं यत् नोद्धरे
त्कदाचन ॥ मोहाद्द्विजस्तदुद्धृत्य पुनर्मंत्रेण धारयेत् इति ॥ स्मृत्यंतरे तु विशेषः ॥ बह्वृचाः साम
गाश्चैव ये चान्ये यजुःशाखिनः ॥ कंठादुत्तीर्यसूत्रं तु पुनः संस्कारभागिनः ॥ मैत्रा मैत्रास्तथा काण्वा
चरका वाजसनेयकाः ॥ कंठादुत्तीर्यसूत्रं तु कुर्युर्वै क्षालनं द्विजा इति स्कांदे ॥ प्रक्षालयेद्यदा सूत्रं

17

मृद्भिरद्भिः शनैः शनैरिति ॥ आचम्येति यथाशास्त्रमाचमनं कृत्वा ॥ तत्र व्याघ्रपादः ॥ प्राङ्मुखो
दङ्मुखो वापि कुर्यादाचमनं क्रियां ॥ पश्चिमे पुनराचम्य दक्षिणे स्नानमाचरेत् ॥ भारद्वाजः ॥
संहतांगुलिनातोयं पाणिना दक्षिणेन तु ॥ मुक्तांगुष्ठकनिष्ठेन द्विज आचमनं चरेत् ॥ गोक
र्णाकृतिहस्तेन माषमग्नं जलं पिबेत् ॥ तन्न्यूनमधिकं पीत्वा पुनराचम्य शुद्ध्यतीति ॥
यमस्मृ ॥ तावन्नाप्स्पृशेद्विप्रो यावद्वामेन संस्पृशेत् ॥ वामे हि द्वादशादित्या वरुणस्तु
जलेश्वर इति ॥ याज्ञवल्क्यः ॥ अंतर्जानु शुचौ देश उपविष्ट उदङ्मुखः ॥ प्राग्वा ब्राह्मेण
तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च ॥ प्रजापतिपि
तृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ दक्षः ॥ प्रक्षाल्य पाणिपादौ च त्रिः पिबेदं वीक्षितं ॥ संह
तांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं ॥ संहताभिस्त्रिभिः पूर्वमास्यमेवमुपस्पृशेत् ॥ अंगु
ष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं ॥ अंगुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे पुनः पुनः ॥ नाभिं

कृनिसंगुष्ठाभ्यां हृदयं नु तलेन वै ॥ सवक्वि ॥ स्तु शिरः पश्चात् बाहू चाग्रेण संस्पृशेत् ॥ शौ
नकः ॥ ताम्रपात्रस्थितैर्वापि तथा तोयाशयस्थितैः ॥ कुर्वन्नाचमनं विप्रस्ततः खानि
समालभेत् ॥ तदलाभे तु कुर्वीत पात्रधारोदकेन वा ॥ अन्यथा यस्तु कुर्वीत नचासौ शुद्धि
माप्नुयात् ॥ वामहस्ते पयः कृत्वा यः खानि समुपस्पृशेत् ॥ रथ्येवाचमनं तस्य प्रायश्चित्ती
यते हि सः ॥ पराशरः ॥ स्नाने भोजनवेलायां संध्ययोरुभयोरपि ॥ आचांतः पुनराचामेद
न्यत्र तु सकृत्सकृत् ॥ स्मृत्यंतरे ॥ कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः ॥ आचांतः
शतकृत्वोपि न शुध्यति कदाचनेति ॥ कात्यायनः ॥ जानुभ्यामूर्ध्वमाचम्य जले तिष्ठन्नशु
ध्यति ॥ मनुः ॥ उदकेवोदकस्थस्तु स्थलस्थले शुचिः ॥ पादौ स्थाप्योभयत्रैव आर्द्रवा
साभवेद्यदि ॥ योगीशः ॥ हृत्कंठतालुगाभिश्च यथासंख्यं द्विजातयः ॥ शुध्यंति स्त्री च शूद्र
श्च सकृत्स्पृष्टाभिरंततः ॥ मुखमध्ये ॥ मृत्तोयेन स्वकं देहं बहिरुद्धर्षयेत्ततः ॥ स्नानशाटीं च
संशोध्य कुर्यादाचमनं द्विजः इति मरीचिवचनात्स्नानशाटीं तटे शोधयित्वाचामेत् ॥ आचम्येसे मे

ज

19

न प्राणायामत्रयं देशकालज्ञानं चाक्षिप्तं ॥ अत्र यमः ॥ सपवित्रंकरं कृत्वा आचम्य प्राङ्मुखस्थितः ॥
प्राणायामत्रयं कुर्यात्कालज्ञानमतः परमिति ॥ तत्र ॥ अब्दायनर्तुमासश्च पक्षतिथ्यृक्षवारकं ॥ योगं
च करणं चेति संकल्पोयमुदाहृत इति प्रसिद्धवाक्यादमुकसंवत्सरइत्यारभ्याऽमुककरणइत्यंतं
कुर्वंति ॥ केचित्तु तिथिवारनक्षत्रयोगकरणान्येव सम्यक्त्वेन नामान्युच्चारयंति ॥ अत्र मनुः ॥
प्रक्षाल्य पादौ हस्तौ च शुचिराचम्य वाग्यतः ॥ तिथिवारादिकं ज्ञात्वा तु संकल्पो यथाविधिरिति
हेमाद्र्युक्तं तु प्रयोगे वक्ष्यामः ॥ केचिन्नित्ये कर्मणि संकल्पाभावमिच्छंति प्रत्यवायपरिहारव्यतिरि-
क्तफलाभावात् ॥ उरुंहीति तोयमामंत्र्यावर्तयेद्ये ते शतमिति ॥ उरुंहीत्यृचा तोयमुपस्थाये-
ति योगिवचनात् ॥ उरुंहिराजेत्यनयर्चा तीर्थं जलं आमंत्र्य संमुखीरस्य ये ते शतमित्यनया
वीत जलं दक्षिणहस्तेनावर्तयेत्सव्यहस्तमामयेत् ॥ आवर्तयेद्ये ते शतमिति त्रिणि जलं तत्वा परस्मै
पदं ॥ तत्स्थो अंगुल्यादयं मंत्रः प्रतिकमात्रेणोक्तः ॥ अत्रापि आवर्तयेत् दुर्वहं ये ते शतमिति त्रचेति १०

योगीवननाथजुषो निरास:॥ योगी॥ यस्तु जानाति तत्त्वेन आर्षं छंदश्च दैवतं॥ एकैकस्य मुनेः प्रा
प्य मुक्तः स तु सल्लोकतां॥ देवतायाश्च सायुज्यं गच्छेत्सैव न संशयः॥ अविदित्वा तु यः कुर्याद्या
जनाध्ययने जपं॥ होममंतर्जलादीनि तस्य वाल्पफलं भवेदिति॥ ऋष्यादिकं तु प्रयोगव
श्याम:॥ सुमित्रिया न इत्यपोंजलिनादाय दुर्मित्रिया इति द्वेष्यं प्रति निक्षिपेत्॥ सुमित्रि
या न आप इत्यनेन यजुषाऽपु जलं अंजलिना आवध्य ते जलं येनांजलिरिति नैवल्कः
हस्तद्वये संपुटेनादाय जलाद्गृहीत्वा दुर्मित्रिया स्तस्मै संतीत्यनेन यजुषा द्वेष्यं रिपुं प्र
ति निक्षिपेत्॥ रिपुं मनसा ध्यात्वांजलिगृहीतं जलं जंतुरहिते भूप्रदेशे प्रक्षिपेत् इत्यर्थः
तथा च ब्रह्मा॥ सुमित्रियेति चादाय जलं दुर्मित्रिया क्षिपेत्॥ जंतुहीने स्थले विप्रः सर्वमेत
च्च शेषतः॥ न तु यो द्वेष्टि कंचिदन्ये न वा द्विष्यते स एव मंत्रं ब्रूयाद्योस्मान्द्वेष्टि इति उता द्वि
षन्नद्विषमाणश्चाप्नोति॥ मंत्रलिंगाद्ग्रातव्यो द्वव्यार्थमिवेति॥ तस्माद्विद्यमानत्वात्द्वे

21

न नकर्तव्यमिति त्रिवं प्राप्तेऽन्यते ॥ यथा निस्तानुस्थानं क्रतोः पर्यो अन्तादि संस्थः तएव पुरुषोंग ॥ भवत्तिना
न्यथा ॥ तथा योस्मान्नेष्ट्वीति मंत्रयव नस्य निस्तानुस्थानमिति ॥ अंतर्द्वि व्यापावेपि कामः को थाध
शिवगं मनसा ध्याला जलं प्रक्षिपेदित्यर्थः ॥ कटिः वस्थूरुजंघे चरणौ करौ मदात्रिस्त्रिः ग्र
द्रात्मानव्य ॥ कट्यते आव्रियत इति कटिः ॥ श्रोणिः स्त्रि नाभेः पृष्ठवंशस्य समंतात्कटिरि
त्यर्थः ॥ वसन्ति वासेव सत्सास्मिन्मूत्रमिति वस्तिः नाभेरधः गुदमेढ्रयोरंतराले वस्तीस
र्थः ॥ ऊर्णुञ् आच्छादने ॥ ऊर्णूयते वासस्ता ता ऊरू ॥ ऊर्णोतिः उणुलोपश्च ॥ वस्तितोधस्ताज्जा
नुपर्यंतावूरूइत्यर्थः ॥ जघन्यते कुटिलं गच्छतस्ते जंघे ॥ जानुतोधस्तादुल्कपर्यंते ॥ चरता
दाभ्यां चरणौ ॥ गुल्फतोधस्तात्तलमभिव्याप्य चरणौ ॥ क्रमंतः कमंतौ करौ ॥ मणिबंधादंगु
ल्यावधि ॥ सव्यहस्तागृहीतयादात्रिस्त्रिरिति विप्साकांडानुसमयस्तानार्थं ॥ पदार्थानुसम
येनाप्युपपत्तेः ॥ प्रक्षालयेदितिशाठ्यसामर्थ्याद्द्विः प्रक्षालयिता ॥ तत्रैवं ॥ आदौ कटिं सद्
नाद्वालिम्पादिदः प्रक्षाल्यैव पुनर्मृदालेपपूर्वकं वारद्वयं तथैव कटिं प्रक्षालयितव्या एवमेव

स्नादीनि क्रमेणैकशः प्रक्षाल्य ॥ ततोथ मंगप्रक्षालनं संभवजाय श्रितं शुद्ध्यर्थं मानवेन तु ॥
योगी ॥ अथ मोतमम मध्यानामंगानां क्षालनं तु यत् ॥ भागैः पृथक् पृथक् कुर्यात् क्षालने मृद
संकरः ॥ वशिष्ठः ॥ मृदैकया शिरः क्षाल्यं द्वाभ्यां भागं तथोपरि ॥ मृद्भिरद्भिश्च गात्राणि क्रम
शश्चावनेजयेदिति ॥ नमस्योदकमालभेदंगानि मृदेदं विष्णुरिति ॥ उदकायनमरति तीर्थोदकं
न मस्कृत्य ॥ आद्यः पृथ्वेति भिः संस्पर्शे ॥ इदं विष्णुरित्येनयर्चा दक्षिणग्रहीतया मृदा शिरः प्रभृ
ति नाभिपर्यंतानि सव्यहस्तगृहीतया नाभिप्रभृति पादपर्यंतानि प्राप्तिलोभ्येनालभेदनुलिंपेत
तदुक्तं सामसूत्रे ॥ मृदा प्रतिलोमान्यंगानि लिंपेच्छरीरान्निति ॥ आलभेत मृदांगानि इदं विष्णुरिति
त्यनेनेति योगी वचनाद्यजुषो निरासः ॥ नमस्येति वाक्यं वादेशाभ्यासः ॥ आलभेदिति पर
स्यैव पदमपि ॥ प्रचेताः ॥ धर्मविद्दक्षिणं हस्तं नाधःशौचे नियोजयेत् ॥ तथैव वामहस्तेन ना
भिरूर्ध्वं न च स्पर्शयेत् ॥ इति ॥ एतन्मृदालंभनं शिरःप्रभृति नाभिपर्यंतानामेवेति केचित् ॥
करयादीनां सर्वमेव प्रक्षालितं तत्वात् ॥ अतश्चैवं विभागः ॥ मृत्तिकां त्रेधा विभज्य एकभागेन

23

पाणिपादप्रक्षालनं ॥ कृत्यादीनां द्वितीयेन ॥ इदानीं तृतीयेनेति ॥ सूर्याभिमुखो मज्जेदापो अस्मानिति
नतः । शंनो नाभिमात्रं जलं प्रविश्य सूर्याभिमुखः सन् ॥ आपो अस्मानिति त्रचा मज्जेत् शिरसा जल
पे मवगाहेत् ॥ प्रचेताः ॥ नाभिमात्रे जले स्थित्वा केशान्कलाछधाद्विजः ॥ निरुध्य कर्णौ नासां च त्रिः सू
लो मज्जंनवेरदिति ॥ सूर्याभिमुखो मज्जेदापो अस्मानिति त्रचेति योगी ॥ स्मृतिसारे ॥ स्रोत
सोऽभिमुखः स्नायान्माजनिन्याचमर्दने ॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोऽभिमुखोपि वेति ॥ स्रव
त्याभिमुखो मज्जेद्यत्रापः प्रवहंति वै ॥ स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथेति आवालिव
नेनदन्यशाखिविषयं ॥ यायाः समुद्रगा नद्यस्तासु स्नानं समुसन्मुखं ॥ सर्वेपि शाखिनः कुर्युर्विना
वाजसनेयिनः ॥ इति स्मृतेः ॥ वाजसनेयिभिस्तु सर्वत्र सूर्याभिमुखेनैव मज्जनं कार्यमित्यर्थः ॥
स्नात्वोदिदस्पद्दत्तुन्मज्य निमज्योन्मज्याचम्य ॥ स्नानशोधने ॥ अंगानि संशोध्य ॥ उद्दितापः
शुचिरिति मंत्रांते उन्मज्याचम्य पुनस्त्रींनिमज्य स्नात्वा उन्मज्य तथैवोत्क्रम्याचामेत् ॥ कौ
शिकः ॥ कक्षादीनि निमज्योन्मज्याचामेति ॥ गोमयनुविलिंपेन्मानस्तोक इति ॥ मानस्तोक इत्य १२
द न

नयत्वा गोमयेन शिरःप्रभृति सर्वाण्यंगान्यनुलिंपेत् ॥ अत्रापि नाभेरूर्ध्वं दक्षिणहस्तेनाधः सव्ये
न च ॥ अत्र विशेषमाह विष्णुः ॥ अग्रमग्रन्निति स्मृत्वा मानस्तोकेन वा पुनः ॥ गोमयैर्लेपयेत्स्ना
तः सोदकैर्भानुदर्शनैरिति ॥ रौद्रमंत्राभिधानादपस्पृशेत् ॥ योगी ॥ गोमयेन तु यः स्नायाद
पादतलमस्तकं ॥ स स्नातः सर्वतीर्थेषु पूतः संवत्सरं भवेत् ॥ ततोभिषिंचेदिमंमेवरुणे
ति च तत्त्वायामि उदुत्तमं मुंचस्व सर्वस्मेति ॥ ततः गोमयलेपनानंतरं इमंमेवरुणेत्येवमादि
भिश्च तत्त्वायामि आपो मौषधीरित्येद्वया ॥ वयमुदुत्तमभिसेकया ॥ मुंचंतुमेति ॥ अवभृथेनि
चंक्रमेणप्रतिमंत्रमभिषिंचेत् ॥ अंजलिनाजलं मूर्ध्नि क्षिपेदित्यर्थः ॥ तथा च योगी ॥ का
र्योभिषेकोंजलिनारमन्यायुश्मिस्तत इति ॥ दक्षिणतुल्सकुशग्रहीतोदकेनेति हरिहरः ॥ अंभमु
द्रयेतिमांत्रिकाः ॥ अत्रपाठक्रमोदेवानुलेपनमत्वभिषेकप्राप्तो ततः शंकुनानुलिप्तगात्रस्यैवाभिषेक
इतिप्राप्यते ॥ अंतेवैतत् ॥ स्नातदर्शभिर्मुग्भिरभिषेचनमंतेपिभवति ॥ यावमानांतेपि कर्तव्यमित्यर्थः

25

निमज्योन्मज्याचम्य दर्भैः पावयेत्॥ निमज्य तूष्णीं मज्जित्वा उन्मज्य उक्तस्याचमनं कृत्वा दर्भैः अग्र
स्थूलैः कुशैः छिन्नमूलैर्वा दक्षिणहस्तेगृहीतैः प्रादक्षिण्येन नाभेरूर्ध्वं शिरो यावत्ततः पुन
र्नाभिपर्यंतं पावयेत्॥ तदुक्तं॥ दर्भैरुन्मार्जनं नाभेरुपरिष्टात्प्रदक्षिणं॥ इदं पावनमद्भिश्च
कुशैरेवापरत्विति॥ स्मृतिसारे॥ न कुशं कुशमित्याहुः समूलं कुशमुच्यते॥ छिन्नादर्भास्तु वै
ज्ञेयासाग्राणुकुतुपं स्मृतमिति॥ अप्रसूताः स्मृता दर्भाः प्रसूतास्तु कुशाः स्मृता इति॥ ग्रंथांतरे
अपाघुमित्युपामार्गैर्दूर्वाकांडादिस्मरणात्॥ त्रिस्त्रिरेकैकमादाय मार्जयेत्सुसमाहित इति
विष्णूक्तं मार्जनमुपाकर्मोत्सर्गस्नानविषयमेव॥ कांडादपाघुमिति द्वौ युक्तौ श्रावणकर्मणीति
स्मरणात्॥ पावनसमाख्यानात्पावनमंत्रानाह॥ आपो हि ष्ठेति तिसृभिरिदमापो हविष्मती दे
वीराप इति द्वाभ्यामपो देवा द्रुपदादिवशन्नो देवीरपां रसमपो देवीः पुनंतु मेति नवभिस्त्रिवृ
त्तिर्मेति॥ आपो हि ष्ठेत्यादिभिस्त्रिवृत्तिर्मेलसं तैर्यथाक्रमपठितैरेव मंत्रैः पावयेदित्यर्थः
योगः॥ दर्भैस्तु पावयेन्मंत्रैरलिंगैः पावकैः शुभैरिति॥ विसनिर्मलत्वपारिजातादो मंत्रैः कौ

स्का॥ऋषिरित्र देवत्या लिंकादय स्तु मंत्रत्रयमाहुः॥ॐकारेण व्याहृतिभिर्गायत्र्या चापादावंतेन॥ॐ
कारेण तिसृभिर्व्याहृतिभिर्गायत्र्या आपोहिष्ठेत्यादेभिस्तिसृभिर्मंत्रस्यांतेन पावयेदित्यन्वयः॥ॐका
रेण व्याहृतिभिर्गायत्र्या च समाहितः॥आदावंते च कुर्वीत मार्जनं च यथाक्रममिति॥अंतर्जलेऽघमर्ष
णं त्रिरावर्तयेत्॥अंतर्जले जलमध्ये मग्नः सन्॥अघं मृष्यते येन तदघमर्षणं॥ऋतं च सत्यं चेत्ये
तत्सूक्तं त्रिरावर्तयेद्वारत्रयं जपेत्॥चतुर्विंशतिमते॥ततोंगुष्ठांगुलिभिः स्वश्रोत्रदृक् नासिकामुखं॥
पिधायांतः प्रतिस्रोतस्त्रिर्जपेदघमर्षणमिति॥कात्यायनः॥अघमर्षणसूक्तं तु अश्वमेधावभृत्स
मम्॥अंतर्जले त्रिरावर्त्य मुच्यते ब्रह्महत्ययेति॥द्रुपदां वाऽयं गौरिति वा त्र्यृचं च प्राणायामं वा सशिर
सं॥यद्वा द्रुपदादिवेत्यृचं॥अयंगौरिति त्र्यृचं॥शिरसा आपोज्योतिरिति मंत्रेण सह प्राणायामं वा त्रिरा
वर्तयेदित्यनुषंगः॥एतेषां शक्तिमत्र द्यपेक्षया विकल्पः॥व्यासः॥द्रुपदा नाम सा देवी वेदे वै तैत्तिरीयके॥
अंतर्जले सकृज्जप्त्वा ब्रह्महत्यां व्यपोहति॥स्मृत्यंतरे॥द्रुपदा नाम गायत्री वेदे वाजसनेयके॥पंच जप्त्वा
जले मग्नो मुच्यते सर्वपातकैः॥हारीतः॥जंबुका नाम गायत्री वेदे वाजसनेयके॥सकृदंतर्जले जप्त्वा ब्रह्म

हत्यां व्यपोहति ॥ तथा ॥ अयं गोः प्रश्निरःक्रमीये तास्त्वं त्रिरं तजले अपन्सर्वस्मासापात्प्रमुच्यते
इति ॥ स्मृतिसारे ॥ सप्तव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ॥ त्रिः पठेत्तु जले मग्नः सर्वपापैः प्र
मुच्यत इति ॥ उत्तमाधिकारिणं प्रत्याह ॥ ओमिति वा विष्णोर्वा स्मरणं ॥ ओमिसत त्रिरावर्त्तयेत्
अथवा विष्णुव्यासो ॥ वेवेष्टीति विष्णुः ॥ तस्य विष्णोः स्मरणं वा कुर्यात् ॥ व्यासः ॥ आवर्त्तयेद्वा
प्रणवं स्मरेद्वा विष्णुमव्ययं ॥ वशिष्ठः ॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ॥ वाङ्म
यं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत् ॥ एकाक्षरं परं ब्रह्म पावनं परमं स्मृतं ॥ सर्वेषामेव पापा
नां संकरे समुपस्थिते इति ॥ शौनकोपि ॥ यथेह गोर्वत्सकृन्तं निशाम्य हुंकृत्य वत्सान्तिमुखी प्रया
ति ॥ ब्रह्मापि तद्वत्प्रणवाभिहूतं वक्तारमागच्छति वाशु वक्त्रे ॥ इत्यादि ॥ नारदीये ॥ सर्वं जगदिदं
विष्णुर्विष्णुः सर्वस्य कारणं ॥ अहंच विष्णुरिति यत्तद्धृदि विष्णोः स्मरणं विदुः ॥ पाद्मे ॥ ये स्मरन्ति सकृद्
ताः प्रसंगेनापि केशवं ॥ ते विध्वस्ताखिलाघौघा यान्ति विष्णोः परं पदमिति ॥ भागवतेपि ॥ नाम्न
स्तु यावती शक्तिः पापनिर्हरणे हरेः ॥ तावत्कर्तुं न शक्नोति पातकं पातकी जनः ॥ इति ॥ अप

मर्षणानंतरं तु स्नी त्रिवारं मज्जित्वा स्नानांगतर्पणं कुर्यात्॥ अत्र प्रचेताः॥ अघमर्षणत्रयेण धूत
पापाः समाहिताः॥ ततो निमज्य वारांस्त्रीन्स्नात्वा तर्पणमाचरेत्॥ दक्षोऽपि॥ नित्यं नैमित्तिकं काम्यं
त्रिविधं स्नानमाचरेत्॥ तर्पणं तु भवेत्तत्र अंगत्वेनोपपद्यते॥ विष्णुः॥ स्नातश्चार्द्रवाससा देवर्षिपि
तृतर्पणमध्यस्थ एव कुर्वीतेति॥ पाराशरः॥ बाहुपूर्णं तिलैर्हत्वा जलस्थस्तर्पयेत्पितॄन्॥ स्थले
स्थेन न कर्तव्यं पितॄणां तृप्तिमिच्छता॥ गोभिलोऽपि॥ भूम्यां यद्दीयते तोयं यदा चैव जले स्थितः॥
रथात्मुनिशार्दूल नोपतिष्ठति कस्यचिदिति॥ पटे तटेऽश्मनि पात्रे रोमकूपेषु ये तिलाः॥ ते ति
लाः कृमिसंयुक्तास्तज्जलं रुधिरायते॥ इति निषेधस्तु मुख्यतर्पण एव॥ तस्मान्नैमित्ति[illegible]धेतु कार्या
विशेषः प्रयत्नतः॥ विशेषोऽयं स्थले प्रोक्तो न जले तु कदाचनेति योगीवचनात्॥ स्मृतिसारे॥ संक्रा
न्त्यादिनिमित्ते तु स्नानांगतर्पणे द्विजाः॥ तिथिवारनिषेधेऽपि तिलैस्तर्पणमाचरेत्॥ अयं नियमो
प्रातःस्नानांगतर्पण एव॥ प्रातःस्नानेन कर्तव्यं कदाचित्तिलतर्पणं॥ जलमध्ये तु कर्तव्यं केवलं कुशवा
रिणेति योगीवचनात्॥ शंखः॥ देवानां च पितॄणां च जले दद्याज्जलांजलिन्॥ स्मृतिसमुच्चये॥ उद्धृते
स्नानांगव्यतिरिक्त

29

रुद्दैकैस्नातो न दद्यादन्यदापुनः॥ स्नानांग तर्पणं विद्वान्कुर्वि न्नैव हावयेत्॥ स्मृतिसारे॥ अस्पर्शस्प
र्शने वांते अश्रुपाते क्षुरे भगे॥ स्नानं नैमित्तिकं कार्यं दैवपैत्र्याविवर्जितं॥ आदित्यपुराणे॥ मृ
ताः कालवशाद्राजन्निर्जने काष्ठलोष्टवत्॥ स्पृक्का स्नानं तु कर्त्तव्यं दैवपित्र्यविवर्जितं मिति॥
सत्यव्रतः॥ अनेन विधानेन देवर्षिपितृतर्पणं॥ स्वशाखाविहितं कुर्यात्स्नानांगं पृथगेव हि॥ प
राशरेपि॥ स्नात्वा तु तर्पयेद्देवानृषीन्पितृगणानपि॥ स्वसूत्रेन च मार्गेण पुनराचम्य वाग्यतः
योगीशः॥ स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः॥ कर्तुमिच्छति दुर्मेधा मोघं तस्य विचेष्टितं॥
बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितं॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्॥ ग
गृह्यसंग्रहकारः॥ यः स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत्॥ अप्रमाणमृषिं कृत्वा सोंधे
तमसि मज्जति॥ यन्नाम्नायः स्वशाखायां पारक्यमविरोधकृत्॥ विद्वद्भिः स्तदनुष्ठेयं अ
ग्निहोत्रादिकर्मवत्॥ कात्यायनोपि॥ अक्रियापि त्रिधा प्रोक्ता विद्वद्भिः कर्मकारिणां॥ अ

क्रियश्चपरोक्तावततीयावायथाक्रियेति ॥ इति प्रथमकंडिकासूत्रार्थः ॥ ८ ॥ ततः किं कुर्यादित्यआह ॥ उत्ती
र्यधौतेवाससीपरिधाय ॥ उत्पूर्वस्तृधातुः जलाद्बहिर्निर्गमे ॥ स्नानांगतर्पणानंतरं उत्तीर्य जला
द्बहिर्निर्गम्य धौते वाससी अरजकादिप्रक्षालिते अंतरीयोत्तरीये द्वे वस्त्रे परिधाय प्रांतद्वये
गोपनेन परिधानं कुर्यात् ॥ कात्यायनः ॥ नोत्तरीयमधः कुर्यान्नोपर्यधस्त्वमंबरमिति ॥ पराश
रः ॥ एकं चेद्वासो भवति तस्यैवोर्ध्वभागेन प्रच्छादयीतेति ॥ स्मृतिसारे ॥ सव्यादंसात्परिभ्रष्टे
नाभिदेशाव्यवस्थिते ॥ वस्त्रे सव्यवासास्तं दैवे पित्र्ये च वर्जयेत् ॥ व्याघ्रपादः ॥ कशायं कृष्ण
वस्त्रं वा मलिनं केशदूषितं ॥ जीर्णं नीलं संधितं च पारक्यं मैथुने धृतं ॥ छिन्नाग्रमुपवस्त्रं
च कुत्सितं धर्मतो विदुः ॥ नैकवस्त्रो द्विजः कुर्याद्भोजनं तु सुरार्चनं ॥ तत्सर्वमसुरेंद्राणां ब्रह्मा
भागमकल्पयत् ॥ सति संभवेऽयं निषेधः इति होमादिकारः ॥ तथा च गौतमः ॥ सति विभवे
न जीर्णवासास्स्यादिति ॥ योगयाज्ञवल्क्यः ॥ अभावे धौतवस्त्रस्य शाणक्षौमाऽविकानि च ॥

मल

कृतं योपपट्टं वाद्विवासो ये नवा भवेत् ॥ अभावे धौतवस्त्रोत्तरीयाभावे ॥ कृतपो नेपालकंबलः ॥ जीव
सित्रम्रजानीयं कुर्यादित्यनेन ॥ वस्त्रोत्तरीयाभावे द्व्यंगुलं त्र्यंगुलं चतुरंगुलं वा ॥ सूत्रैर्वस्त्राकृति
परिमंडलं तदुत्तरीयं कुर्यादिति ज्ञा नूरूपेणोक्तिमुत्तरीयरूपं निषिद्धं ॥ नोत्तरीयवासोमात्रं ॥ तस्मा
द्योपवीतीति नापि द्विवस्त्रतासंपादनाया ॥ तथा च मनुः ॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि
वस्त्राभावे तृतीयं तु एवं तु प्रथमाश्रमी ॥ वस्त्राभावे उत्तरीयवस्त्राभावे ॥ धारयन्ति समेतानि
आयुःकामो बहून्यपि ॥ ब्रह्मचारिण एकं स्यात्सहन्नैव द्वितीयकं ॥ उपवीतमलंकारं स्वजं कर
कमेव च ॥ उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥ शातातपः ॥ प्रागग्रमुदगग्रं वा धौतवस्त्रं
प्रसारयेत् ॥ पश्चिमाग्रमुदक्षिणाग्रे तु पुनः प्रक्षालनं जगुरिति ॥ मदोकूकरौ प्रक्षाल्य ॥ वस्त्रप
रिधानानंतरं स्वदाद्वेश्रोरूकृलोक प्रसिद्धे जंघे रस्तो च प्रक्षालयेत् ॥ तथा चोक्तं ॥ स्नात्वा नि
रस्य वासाय जंघे प्रक्षाल्य चांभसा ॥ अपवित्रीकृते ते तु कौपीनं शुन वारिणा ॥ कौपीनं भपा
नप्रदेशः ॥ योगी ॥ स्नात्वैवं वाससी धौते आक्लिन्ने परिधापयेत् ॥

प्रक्षाल्यो रुद्रसाक्षिश्च हस्तौ प्रक्षाल्य येन तरति ॥ ततः शिरश्चारभ्यां तीर्थमृत्तिकया तिलकं भस्म
ना वा त्रिपुंड्र मूर्ध्वपुंवा यथाश्रद्धया कुर्यात् ॥ वशिष्ठः ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा ललासंध्यासमाचरेत्तरति
॥ पाद्मे ॥ यागो दानं जपो होमः स्वाध्यायः पितृतर्पणं ॥ वृथा भवति तत्सर्वमूर्ध्वपुंड्रं विना कृतं ॥
यत्तदानं तपश्च यज्ञिष्टोमादिकं च यत् ॥ ऊर्ध्वपुंड्रधरः कुर्यात्तस्य पुण्यमनंतकं ॥ ललाटे हृदि बा
ह्वोपच तुः पुंड्राणि धारयेत् ॥ मूर्तयो वासुदेवाद्याश्चतुः पुंड्रेषु धारयेत् ॥ द्वयोर्गोविंदविष्णोस्तु
एकं नारायणो धरेत् ॥ एवं पुंड्रविधिः प्रोक्तो सर्वेषां गिरिजे मया ॥ ललाटादिषु द्वादशस्थानेषु के
शवादि द्वादशनाममंत्रैर्वा धारयेत् ॥ क्रियासारे न तत्स्नानं न तद्ध्यानं न तज्जपः ॥ त्रिपुंड्रेण विना
येन विप्रेण यदनुष्ठितं ॥ कात्यायनः ॥ श्राद्धे यज्ञे जपे होमे वैश्वदेवेऽन्यकर्मसु ॥ धृतत्रिपुंड्रपूता
त्मा मृत्युं जयति मानवः ॥ पुलस्त्यः ॥ अग्निरित्यादिभिर्मंत्रैः शुद्धं भस्माभिमंत्रितं ॥ शिवमं
त्रेण तत्पुरुषमंत्रेण षडक्षरेण वा ॥ गायत्र्या वा स्वदेवस्य मंत्रेण प्रणवेन वा ॥ धारयेदिति शेषः ॥
॥ आचार्यः ॥ ललाटे हृदये कंठे बाह्वोः पृष्ठे परे गले ॥ त्रिपुंड्रं भस्मना कुर्यादिष्टमंत्रेणवो

33

दितभिति ॥ स्मृतिरत्नावल्यां ॥ मध्यांगुलित्रयेणैवं स्वदक्षिणकरस्य च ॥ त्रिपुंड्रं धारयेद्विद्वा
न्सर्वकल्मषनाशनं ॥ तर्जन्यनामिकांगुष्ठैरनुलोमविलोमतः ॥ अतिस्वल्पमनायुष्य
मतिदीर्घं तपःक्षयं ॥ नेत्रयुग्मप्रमाणेन त्रिपुंड्रं धारयेद्द्विजः इति ॥ मध्यांगुलित्रयेणैवेति नि
यमस्तु ललाटातिरिक्तस्थलविषयः ॥ संस्कारे ॥ नृपाणामीश्वराणां च भस्ममिश्रेण चंदने ॥ त्रि
पुंड्रं विधिवत्कुर्यात्सुगंधेनापि वा हरिः ॥ स्मृतिसंग्रहे ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा मध्ये शून्यं प्रधार
येत ॥ मृणुसन्मुस तन्मध्ये ऊमयाव श्रीयाहरीति ॥ धर्मप्रदीपे ॥ ऊर्ध्वं न धारयेन्मूर्तिं न
तीर्थगोपि वंदनं ॥ तीर्थगरूर्ध्वसुरक्तं च धारयेच्चंदनादिकं ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा धारये
त्सर्वं द्विजः ॥ ऊर्ध्वपुंड्रे त्रिपुंड्रं स्यान्नोर्ध्वपुंड्रं त्रिपुंड्रके इति ॥ ततः स्वशाखोक्तविधिना
नित्यं कर्म समारभेदिति ॥ आचम्य त्रिराचम्य सूत्र ॥ कुशासने उपविष्टः सन् ॥ आचमनं
लेखा ॥ निरुक्तियाता अस्तन प्राणान् आचम्य संनिरुध्यात ॥ तथाचोक्तं ॥ अथाचम्य कुशे

सुखेरासनेसमुपास्थित:॥करसंपुटकंकृत्वासंध्यांनित्यंसमाचरेत्॥
बृहस्पति:॥बद्धासनमथाभ्यस्यलान्वाषादिकंतत:॥ससमी
क्षितदकूर्मोनीप्राणायामान्समभ्यसेत्॥स्कांदे॥गायत्रींशिरसा
र्द्धसप्तव्याहृतिपूर्विकां॥त्रिर्जपेत्सदशोंकार:प्राणायामोयमुच्यते॥
कात्यायन:॥भूराद्यास्तिस्त्रएवैता:महाव्याहृतयोव्यया:॥महर्जन
स्तप:सत्यंगायत्रीचशिरस्तथेति॥प्रतिप्रतीकंप्रणवमुच्चारयेत्॥ र
शिव:॥पुनश्चैवत्रिभि:कुर्याद्धिह्रस्वश्चात्रिसंधिषु॥ब्रह्मचर्याश्र
मस्थानांवनस्थानांमहामुने॥प्राणायामोविकल्पेनप्रोक्तोवेदां
तवेदिभि:॥सबीजोऽबीजोवा॥ध्यानजपसहित:सबीज:॥अबी
जोनिर्गुणोपासनं॥परमहंसानामबीजएव॥द्विजवृक्षत्रियस्यो

क्ता प्राणायामो महामुने ॥ विरक्तानां प्रबुद्धानां वैश्यानां च तथैव च ॥
शूद्राणां च तथा स्त्रीणां प्राणसंयमने मुने ॥ नमोंतं शिवमंत्रं वा वैष्ण
वं वा न चान्यथा ॥ नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोडशः ॥ पाद्मे ॥
द्वौ द्वौ प्रातर्मध्याह्ने त्रयः संध्यासुरार्चने ॥ वैश्वदेवे भोजनांते प्राणा
यामस्तु षोडशेति ॥ मार्कंडेयपुराणे ॥ प्रथमं साधनं कुर्यात्प्राणाया
मस्य योगवित् ॥ प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥ आदा
नरोधमुत्सर्गं वायोस्त्रिस्त्रिसमभ्यसेत् ॥ ब्रह्माणं केशवं शंभुं ध्या
येद्वानुक्रमात् ॥ रक्तं प्रजापतिं ध्यायेद्विष्णुं नीलोत्पलप्रभं ॥
शंकरं त्र्यंबकं श्वेतं ध्यायेन्मुच्येत बंधनात् ॥ वामेन दक्षिणेन वा
वायोपूरणमुभयमपि शास्त्रार्थः ॥ स्मृतिसारे ॥ दक्षिणे श्वासमा

इसवामेन्येव विसर्जयेत् ॥ अनेन विधिनान्येव प्राणायामो विधीयते ॥
योगयाज्ञवल्क्यस्तु ॥ दक्षिणे रेचयेत् वायुं वामेनापूरितोदरं ॥
कुंभेन धारयेन्नित्यं प्राणायाममिदं बुधाः ॥ पीडयेद्दक्षिणां
नाडीमंगुष्ठेन तथोत्तरां ॥ कनिष्ठानामिकाभ्यां च मध्यमां
तर्जनीं सृजेत् ॥ स्मरस्वंतरे ॥ अस्मत्स्यपदिके नैव मध्यमां न
र्जनीं स्पृशेत् ॥ आसः ॥ अंगुष्ठतर्जनीभ्यां तु ऋग्वेदी साम
गायनः ॥ अंगुष्ठानामिकाभ्यां तु ग्राह्या सर्वैः स्वपर्वभिः ॥ नि
त्यदेवार्चने होमे संध्यायां श्राद्धकर्मणि ॥ स्नाने दाने तथाध्या
ने प्राणायामास्त्रयः स्मृताः ॥ रुद्र वसिष्ठः ॥ पंचांगुलिभि

37

नासाग्रपीडनं प्रणवाभिधा ॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थ-
योः ॥ विष्णुपुराणे ॥ पूरकः पूरणं वायोः कुंभकः स्थापनं स्मृतं ॥
बहिर्निःसरणं तस्य रेचकः परिकीर्तितः ॥ कात्यायनः ॥ [illegible]
वासिन्यासमानं परिक्षिप्य संयतः ॥ प्राणायामत्रयं कुर्यात्संध्यासु च
निरत्स्वपि ॥ मनुः ॥ दह्यंते ध्मायमानानां धातूनां हि यथा मलाः ॥
तथेंद्रियाणां दह्यंते दोषाः प्राणस्य संयमात् ॥ इति ॥ ॥ पुष्पाण्यं
बुभिश्राण्यूर्ध्वं प्रक्षिप्य ॥ ॥ पुष्पाणि कुसुमान्यभावे बिल्वादि
पत्राण्यंबुभिश्राणि जलसंयुक्तान्यंजलिना गृहीत्वोर्ध्वमुपरिक्ष
यामिमुखस्तिष्ठन् ॥ ॐकारव्याहृतियुतं गायत्र्यास्त्रं जेत् ॥
तथा चोक्तं कौर्म्ये ॥ ॐकारव्याहृतियुतां गायत्रीं वेदमातरं ॥

दत्वा जलांजलिं दद्यात्स्मारकं प्रति जन्मानाः ॥ वेदमात
रमुच्चर्येत्सन्ध्याहारः ॥ जन्मना [illegible]द्वि जन्मनाः ॥ योगिनाः ॥
कराभ्यांनोयमादाय गायत्र्या चाभिमंत्रितं ॥ आदि
त्याभिमुखस्तिष्ठंस्त्रिः क्षिपेत्संध्ययोर्द्वयोः ॥ मध्या
न्हेतु सकृच्छ्रैवक्षेपणीयं द्विजेन्वै तैर्याँ जातिभिः ॥ ईष
न्नम्रः प्रभाते तु मध्यान्हे ऋजु संस्थितः ॥ उपस्थवा
नु सायान्हे भूमावर्घ्यं विनिक्षिपेत् ॥ इति ॥ ऊर्ध्व
बाहुः सूर्यमुदिक्षन्नुद्धयमुद्वुसांचित्रेन श्रद्धगाँ

यत्राप्य यथाशक्तिर्विभ्राडित्यनुवाकं पुरुषसूक्तशिवसंकल्पमं
डलब्राह्मणैरिसुपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भे
षु ॥ ॥ उर्ध्वो सूर्यमभिमुखो बाहू यस्य स उर्ध्वबाहुः सूर्यमुदी
क्षमाणादित्यमुदीक्षमाणः उद्वयं तमित्यादि चित्रं भि गायत्र्या च
यथाशक्ति ॥ सहस्रपरमां देवीं शतमध्यां दशावरामित्यादि वि
भ्राडित्यनुवाकेन सहस्रशीर्षेत्यादिषोडशर्चेन पुरुषसूक्तेन य
ज्जाग्रतस्त्यादिषड्दर्चेन शिवसंकल्पेन मंडलब्राह्मणेन च उ
पस्थाय सूर्यं तत्तुल्यात्मेव प्रदक्षिणीकृत्य नमस्कृत्य वाअनो
भिः प्रणम्य ॥ आसनोपरि प्रागग्रेषु उदगग्रेषु वात्रिषु कुशे
षु प्राङ्मुखो वा उपविशेत् ॥ दर्भग्रहणमासनांतरस्युदासार्थं ॥

दर्भासनं सदापूतमिति स्मरणात् ॥ अत्रोपवेशनसामर्थ्यादुद्यमि
षादिनमस्कारांतं तिष्ठतैव कर्त्तव्यं ॥ केचिद्विद्वापुत्री जपस्तूपविश्ये
त्याहुः ॥ शातातपः ॥ तिष्ठंश्चेदीक्षमाणोर्कं जपं कुर्यात्समाहितः ॥
अन्यथा प्राङ्मुखः कुर्यात्समासीनः कुशासने ॥ स्कांदे ॥ उद्वयमुदु
त्यंचैव चित्रंदेवेति तत्परं ॥ तच्चक्षुरित्युपस्थानं मंत्रा ब्रध्नस्य सि
द्धिदाः ॥ मनुः ॥ ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ॥ वान
प्रस्थो यतिश्चैव हि सहस्राधिकं जपेत् ॥ व्यासः ॥ अष्टोत्तरं वा
तं नित्यमष्टाविंशतिमेव वा ॥ विधिना दशकं वापि त्रिकालेषु ज
पेद्बुधः ॥ संभवापेक्षयैते विकल्पाः ॥ योगीश्वरः ॥ ओंकारपूर्व
मुच्चार्य भूर्भुवः स्वस्तथैव च ॥ गायत्री प्रणवश्चांते जपोत्येष

उदाहृतः ॥ स्मृतिसारे ॥ गृहस्थो ब्रह्मचारी वा प्रणवाद्यामिमां
जपेत् ॥ अंते यः प्रणवं कुर्यान्नासौ सिद्धिमवाप्नुयात् ॥ अंते प्रण
वोङ्कारस्तु वनस्थसंन्यासिनामेव ॥ गोभिलः ॥ न केवलां विनाम
हाव्याहृती गायत्रीमुदीतां जपेत् ॥ यामामग्निमुखाप्रोक्ता तस्मादुत्था
य तां जपेत् ॥ उत्थापूर्वविषयं सायंसंध्याविषयं ॥ जपन्नासीत सावि
त्रीं प्रत्यगातारकोदयात् ॥ इति याज्ञवल्क्योक्तेः ॥ व्यासः ॥ वस्त्रेण
छाद्य स्वकरं दक्षिणं यः सदा जपेत् ॥ तस्य तत्सफलं जाप्यं तद्धीनं
निःफलं मतं ॥ कात्यायनः ॥ संध्यात्रयेपि पूर्वस्थानमेतदाहुर्मुनी
षिणः ॥ मध्याह्ने तु उपर्यस्य विभ्राडादीच्छया जपेत् ॥ स्कांदे ॥
विभ्राडित्यनुवाकं वा रुद्रसूक्तं वा पौरुषं जपेत् ॥ शिवसंकल्पम
थवा मंडलब्राह्मणं तु वा ॥ एतानि वोपस्थानानि विप्रो निक

राणि च ॥ कश्यपः ॥ हस्ताभ्यां स्वाञ्जलिं कृत्वा प्रान्तस्तिष्ठेद्दि-
वाकरं ॥ मध्यान्हे तु ऋजू बाहू स्नाय मुकुलितौ करौ ॥ उप
वेशानानंतरं किं कुर्यादित्यत आह ॥ दर्भपाणिः स्वाध्यायं
च यथाशक्त्यादरात् आरभ्य वेदं ॥ ॥ उपग्रहातिरिक्ते दर्भाः
पाण्योर्यस्यासौ दर्भपाणिः स स्वाध्यायं ब्रह्मयज्ञं स्वशा
खाध्ययनं ॥ स्वशाखाध्ययनं विप्र ब्रह्मयज्ञं स्व उदाहृ
तः इति लिङ्गपुराणात् ॥ चकारात् ॥ अन्यशाखाऽथवां
गिरस इतिहासादीनां वाध्ययनं वा शक्त्यनुसारेण कुर्यात् ॥
किं तु आदौ अदित आरभ्य उपक्रम्य किं वेदं ॥ मंत्रब्रा

43

स्रणात्मकं ।। अत्रैवेदमित्येके वचनमभिवाञ्छितं ।। शौनकः ।।
ॐकारव्याहृतीस्तिस्रो गायत्रीं त्रिपदां तथा ।। मनसैवेदम
नुस्मरन् स वेदादिकमुपक्रमेत् ।। ॐकारपूर्विकास्तिस्रो म
हाव्याहृतयोऽव्ययाः ।। त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो
मुखमिति ।। योगयाज्ञवल्क्यः ।। आदावारभ्य वेदं तु संना
ल्लो परिक्रमात् ।। यदधीतेऽहरहस्यात्स स्वाध्याय इति
श्रुतिः ।। कालान्तरेऽपि जपयज्ञः स्मर्यते ।। छंदोगपरि
शिष्टे ।। प्रश्नश्रुतिर्जपः प्रोक्तो ब्रह्मयज्ञः स तु स स्मृतः ।।

सन्ध्यावार्कु तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदे
वावसाने वा नान्यत्रेत्य निमित्तकात् ॥ कौर्मे ॥ यदि स्या
त्तर्पणादर्वाकु ब्रह्मयज्ञः कृतो नहि ॥ कृत्वा मनुष्ययज्ञं
तु ततः स्वाध्यायमारभेत् ॥ स्मृतिः ॥ स्ववर्णवलयोपेतमा
त्रास्थानक्रियाश्रितं ॥ वेदमेव पठेद्यस्तु स्वाध्यायफलमश्नु
ते ॥ मनुः ॥ आहैव स नखाग्रेभ्यः परमं तप्यते तपः ॥ स्रगापि
या द्विजोधीते स्वाध्यायं शक्तितोन्वहं ॥ वेदोपकरणे चैव जपे चैव तु
नैत्यके ॥ नानुरोधोस्त्यनध्याये होममन्त्रेषु चैव हि ॥ वेदोपकरणं
तु पाकर्म ॥ ॥ इति द्वितीयकंडिकासूत्रार्थः ॥ ७ ॥ ७ ॥

॥ श्रीगणेशाय नमः ॥ ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुं रुद्रं प्रजापतिं
देवाछंदा७सिवेदान्ऋषीन्पुराणाचार्यान् गं धर्वानितराचार्या
न्संवत्सरं चसावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्स
रितो मनुष्यान्यक्षान्रक्षा७सि पिशाचान्सुपर्णान्भूतानि प
शून्वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामित्योंकारपूर्वं ॥
॥ तर्पयेत्प्रीणयेत् ॥ ब्रह्माणं पूर्वमादौ ॥ केषां ॥ विष्ण्वादिदेवानां ॥
ननु पूर्वशब्दोपादानं व्यर्थं ॥ पाठक्रमादेव प्राथम्यं ब्रह्मणः प्राप्तत्वा
त् ॥ सत्यं माध्यंदिनकाण्वशाखिनां स्मृतिपुराणप्राप्तस्य मोदा
दीनां तर्पणस्य निषेधार्थः ॥ पूर्वशब्दोपादानं ॥ योगयाज्ञव
ल्क्योपि ॥ आवाह्य देवताः सर्वा विश्वेदेवास इत्यृचा ॥ ब्रह्माणं त
र्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिमिति ॥ सावयवमिति चकारात्संव

कारस्तेषां विशेषणं ॥ चतुर्विधं इति भूतग्रामस्य च ॥ ॐकार पूर्वं प्र
णवपूर्वकं तर्पयेदित्यर्थः ॥ तथा चोक्तं छंदोगपरिशिष्टे ॥ ब्रह्मय
ज्ञो अपो हो मो देवर्षिपितृकर्मसु ॥ अनोंकृत्य कृतं सर्वं न भवेत्सिद्धि
कारकमिति ॥ तर्पयेद्ब्रह्माणमित्यत्र तर्पणक्रियायाः कर्मभूतान् ब्र
ह्मादीन् अभिधाय भूतग्रामं चतुर्विधस्तृप्यत्वामित्यत्र प्रथमप्रयो
गमुपदिशंत्याचार्याः ॥ ततश्च ॐ ब्रह्मा तृप्यतामिति तर्पणे प्रयोगः ॥
कार्यः ॥ गोभिलपरिशिष्टे ॥ तर्पणे चैव मां प्रथमा प्रोक्ता श्राद्धे संबु
द्धिरुच्यते ॥ पिता तर्पणकाले तु पितुः स्याच्छ्राद्धकर्मणीति ॥ अत्र वि
सर्जनीयः देवादावाद नमः पितृभ्यः ॥ तथा योगयाज्ञवल्क्यः ॥ आ
वाह्य पूर्ववन्मंत्रैरास्तीर्य च कुशान् क्षितौ ॥ प्रागग्रेषु कुर्वा मूस

47

तान्दक्षिणाग्रेषु वै पितॄन् ॥ नामगोत्रे समुच्चार्य दद्याल्लक्षणवपूर्व
कं ॥ नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना ॥ नोपतिष्ठन्ति तत्तोयं
यत्र भूमौ प्रदीयते ॥ यस्तु ॥ उभाभ्यामपि पाणिभ्यामुदकं यः प्र
यच्छति ॥ स मूढो नरकं याति कालसूत्रमवाक्शिराः इति व्यासप्रपा
दवचनं न तच्छ्राद्धादिविषयं ॥ तथा चोक्तं ॥ श्राद्धे दाने विवाहे च पाणि
नैकेन दीयते ॥ तर्पणे तूभयेनैव जलं देयं तु नान्यथा ॥ विष्णुः ॥
यत्राम्भो न्यस्य जलं चेत्स्यादुदके देवतापितॄन् ॥ तर्पयेत्तु पयामिम
सु सर्वं प्रतिष्ठितामिति ॥ हारीतश्च ॥ पात्राद्वा जलमादाय शुभे
पात्रान्तरे क्षिपेत् ॥ जलपात्रेऽथवा गर्ते न्यस्य जलं तु वि बर्हिषि ॥
पितामहः ॥ हेमरौप्यमयं पात्रं ताम्रकांस्यसमुद्भवं ॥ पितॄणां पात

पर्णेयोऽयंपमन्मयंतुपरिसृजेत् ॥ अपूर्वप्राप्तेषु नद्याविख्याततीर्थे
षुआवाहनाभावः ॥ तत्रतेषांनित्यत्वात् ॥ तथाचोक्तं ॥ गिरिषुख्या
ततीर्थेषु नदीषु सविशेषतः ॥ सकांक्षपिनरोनित्यंतिष्ठंतिसलि
लार्थिनः ॥ स्कांदे ॥ रवेरर्घ्यांविधायर्घ्यंततस्तर्पणमाचरेत् ॥ द
र्भानगर्भानादायनवसप्ताथ्यपल्लवा ॥ साग्रान्समूलानच्छिन्ना
नृद्विजोदक्षिणपाणिनेति ॥ तर्पणप्रकारस्तु गोभिलः ॥ देवोह
स्तोयुग्मतः कृत्वापूरयेदुदकांजलिं ॥ गोशृंगमात्रमुद्धृत्यजल
मध्येजलंक्षिपेत् ॥ दक्षः ॥ प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखः
सुरान् ॥ उदङ्मुखोमनुष्यांश्चपित्रादीन्दक्षिणामुखः ॥ तर्पयेदि
त्यध्याहारः ॥ स्मृत्यंतरे ॥ प्राग्गैस्तर्पयेद्देवानुदग्गैस्तुमानुषान् ॥

49

तानेवद्विगुणीकृत्यतर्पयेत्प्रयतः पितॄन् ॥ द्विगुणीकृतमूलाभ्यां
पितृतीर्थगताभ्यामित्यर्थः ॥ मनुष्यतर्पणे अग्राणां प्राजापत्य
तीर्थेन संबंधः ॥ गोभिलः ॥ दर्भाः कृष्णाजिनं गावो मंत्राग्निर्ब्रा
ह्मणाः सुराः ॥ नैवनिर्माल्यतां यांति योज्यमानाः पुनः पुनः ॥ अ
तो देवतर्पणोपयुक्तैरपि दर्भैर्मनुष्यपितृतर्पणकरणे न प्रत्यवायः ॥
ततो निवीति मनुष्यान् ॥ ततो देवतर्पणानंतरं निवीति कंठावलंबि
तसूत्रः सन् मनुष्यान्देवमानवान्तर्पयेदित्यनुषंगः ॥ भारद्वाजः ॥
कंठावलंबितं चैव ब्रह्मसूत्रं यदा भवेत् ॥ तन्निवीतिमिति ख्यातं शा
स्तं कर्मणि मानुषे ॥ योगिश्च ॥ मनुष्याणां तथा कुर्यात्तर्पणं कंठस
ज्जने ॥ प्राजापत्येन तीर्थेन तर्पयेद्ब्रह्मणः सुतान् ॥ अत्र दिङ्नियमो

पिनंदीपुराणेक्तः ॥ एकाग्न्यामूर्धकोवे पूर्वब्रह्मपुत्रांश्च तर्पयेदिति ॥
स्थलेतु उदङ्मुख एव ॥ तथाचोक्तं ब्रह्मवैवर्ते ॥ सोम्याश्यभिमुखो
निसामुदगग्रे च बर्हिषि ॥ मनुष्याणांचतुष्टयं निक्षिपेत्तु जलांज
लीनिति ॥ तानेवाह ॥ सनकंश्च सनंदनं तृतीयंश्च सनातनं ॥ कपि
लंश्चासुरिश्चैव वोढुं पंचशिखस्तथा ॥ ॥ इतिश्लोकपठिताः सप्त
मानुषाः ॥ तथाचोक्तं संवर्त्ते ॥ एते ब्रह्मसुताः सप्त मानुषाः परि
कीर्तिता इति ॥ ॥ ततोपसव्यं तिलमिश्रं कव्यवाउनलद सोमंयम
मर्यमणमग्निष्वात्तासोमपोबर्हिषदः ॥ ॥ ततः मनुष्यप्रीणना
नंतरं अपसव्यं प्राचीनावीतं कृत्वा तिलैर्युक्तं उदकं गृहीत्वा कव्य
वाउनलादींस्तर्पयेदितिसंबंधः ॥ अग्निष्वात्तां सोमपोबर्हिषदः

51

४

सत्रपितृपदं संयोज्यं ॥ तत्रैवं प्रयोगः ॥ अग्निष्वात्ताः पितरः सोमपा
पितरः बर्हिषदः पितर इति अपसव्यमित्येनेन सव्यजानुपातः ॥
दक्षिणमुखता च ज्ञातव्या ॥ तथाच कात्यायनः ॥ सव्यं जानु ततोन्वा
च्याहृपाणिभ्यां दक्षिणामुखः स्वलिंगैस्तर्पयेन्मंत्रैः सर्वान्पितृग
णांस्तर्पयेति ॥ शुक्लैश्च तर्पयेद्देवान्मनुष्यांछबलैस्तिलैः ॥ पितॄन्कृ
ष्णतिलैर्भक्त्याविधिवत्सर्वदाद्विजः ॥ भारद्वाजः ॥ उत्क्षिप्ते वामबा
हौतु दक्षिणस्कंधमाश्रितं ॥ प्राचीनावीतमित्याहुस्तत्पित्र्येष्वेव क
र्मसु ॥ पैठीनसिः ॥ अपसव्यं ततः कृत्वान्यिच्छ्वान्वापितृदिङ्मुखः ॥
पितृदैव्यानि सर्वाणि पितृतीर्थेन तर्पयेत् ॥ मरीचिः ॥ विवाहे चो
पनयने चौले सति यथाक्रमं ॥ वर्षमर्द्धं तदर्धं च नेत्याहुस्तिलतर्पण

ष्विति ॥ षष्ठ्यां सप्तम्यां तन्मासि नेत्याहुस्तिलतर्पणमिति स्मृत्यर्थसारः ॥
मात्रपादस्तु ॥ भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च ॥ पिं
दानं मृदास्नानं न कुर्यात्तिलतर्पणं ॥ तीर्थे तिथिविशेषे च गया
यां प्रेतपक्षके ॥ निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं ॥ क्षयाहे
पातसंक्रांतौ ग्रहणे चंद्रसूर्ययोः ॥ न वारतिथिदोषोत्र कुर्यान्नित्यतिल
तर्पणं ॥ मरीचिः ॥ कठाः काण्वाश्च जाबाला ये च वाजसनेयिनः ॥ स
तिलं तर्पणं कुर्यान्निषिद्धेपि दिनेष्वपि ॥ [illegible]तातपः ॥ स्वर्णमौक्ति
कहस्तेन कर्तव्यं पितृतर्पणं ॥ मणिकांचनहस्तेन न रूप्येण न कदा
चनेति ॥ स्मृत्यंतरेपि ॥ मुक्तहस्तेन दातव्यं न मुद्रां तत्र दर्शयेत् ॥
तर्जन्यंगुष्ठयोगे न मुद्रेयमभिधीयत इति ॥ योगी ॥ आनाभि

53

कयां धृतं हेमं तर्जन्यां रूप्यमेव च ॥ कनिष्ठिकया धृतं खड्गं तेन पूतो
भवेद्द्विजः ॥ शंखस्तु ॥ विनारौप्यसुवर्णेन विनाताम्रतिलैस्तथा ॥
विनादर्भैश्च मंत्रैश्च पितॄणां नोपतिष्ठते ॥ ममसारजतेनेति सुवर्णा
रूरनिर्मिता ॥ द्विमुहूर्तात्तु ताम्रेण तथाप्येवातिलोदकान् ॥ दर्भैः स
समहूर्त्तेन मंत्रसुक्तं तथाक्षयमिति ॥ धर्मप्रदीपे ॥ प्रेतस्य स्कंध
वहनं स्नानं कत्राविभागतः ॥ न जीवत्पितृकः कुर्यात्तर्जन्यां रौप्य
धारणमित्यादि ॥ ॥ यामांश्चैव के ॥ एके आचार्याः यमांस्तर्पये
दित्याहुः ॥ एके मत्स्यपुराणाद्विकल्पः ॥ यमानेवाहुः ॥ ॥ यमाय ध
र्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्ष

यायच ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय
चित्रगुप्ताय वै नमः ॥ इति श्लोकपठिताश्चतुर्दश ॥ यमतर्पणे नमस्का
रः सर्वत्र योज्यः ॥ पद्मे विशेषः ॥ पितृत्वादपसव्येन दक्षिणाभिमुख
स्थितेः ॥ देवत्वादूर्ध्वतीर्थेन यमं संतर्पयेद्बुध इति ॥ पितृतर्पणे तु वि
संख्या प्रागुपरि कंफत्वं न्याह ॥ ॥ एकैकस्य तिलैर्मिश्रांस्त्रीस्त्रीन्द
द्याज्जलांजलीन् ॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यतीति ॥ ॥
एकैकस्य प्रत्येकं कं कव्यवाडनलादेः सप्ततिलपुष्पजलपूर्णान्
जलौ स्त्रीस्त्रीन्दद्यात् ॥ यावज्जीवजन्मत आरभ्य तर्पणादिनप
र्यंता आचरितं पापं अशुभं कर्म तत्क्षणादेव तर्पणसमनंतरमेव
नश्यति क्षीयते ॥ स्मृति तिलमिश्रमित्यनेन नमस्कारोपु नतिल श्राद्धो

पात्राणं व्यर्थं स्यात् ॥ अस्मत्तरेभ्य मादीनां पितृदेवोभय रूपत्वान्नि
यमायेति सदोषः ॥ स्मस्तु के निषिद्धे दिने तिलनिरस्तिमांभ्र
दिसैतदर्थमिति हरिहरः ॥ अंजलि संख्या पाश्यासः ॥ एकै
कमंजलि देवाः द्वौ द्वौ तु सनकादयः ॥ अर्हति पितरस्त्रींस्त्रींस्त्रि
यस्त्वेकैकमंजलिं ॥ रुद्र ग्रात्तातु पस्तु ॥ मातृमुख्याश्च यास्ति
स्तस्तासां दद्यात्सुलो अंजली तु ॥ स्त्रींस्त्रीन्नैव चव्यास्यासां दद्यादे
कैकमंजलिं ॥ देवमानुषे तर्पणे ब्रह्मांडविशेषः ॥ अंजलिद्वि
तयं दद्यादेवं ससतर्पयं द्विजः ॥ ऋषीणां च मनुष्याणां सकृदेव
प्रदापयेदिति ॥ अन्तश्च पारस्कर सूत्रानुसारिणं देवमानुषे

चतर्पणेसंख्याविशेषानभिधानाद्विकल्पः ॥ जीवपितृकोप्येतान्
यांश्चेतर ॥ जीवोपितायस्यासौजीवपितृकः ॥ सोपिएतान्पूर्वो
क्तान्अस्मादिचित्रगुप्तांतान् ॥ चशब्दे ॥ इतरस्तुजीवपितृकादन्यो
मृतपितृकः ॥ अन्यानप्योपरान्पित्रादीन्तर्पयेदितिपूर्वेणसंबंधः ॥
॥ विष्णुः ॥ अपसव्यंद्विजेंद्राणांपित्र्यंसर्वत्रकीर्तितं ॥ अकोष्ठात्तुप्रकर्त
व्यंमातापित्रोस्तुजीवतोः ॥ नजीवपितृकइत्येभ्यस्तिलैस्तर्पणमाचरे
दिति ॥ अतिलमेवेतिकौंडिन्यः ॥ या ॥ गि ॥ यदिस्याज्जीवपितृकःए
भ्योदद्यात्स्वयंसुतः ॥ पराशरस्तु ॥ वृद्धेतीर्थेचसंन्यस्तेतातेचपति
तेतथा ॥ एभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइति ॥ शंखः ॥ ए
वंयःसर्वभूतानितर्पयेदन्वहंद्विजः ॥ सगच्छेत्परमंस्थानंतेजोमू

57

त्तिरन्नामयं ॥ ॥उदीरतामंगिरसस्त्वा पंतु नस्तु ऊर्जं वहंतीः पितृभ्यो ये
न्येत मधु वाता इत्यृचं जपन्नुप्रासिंचेत् तृप्यध्वमिति च त्रिः ॥ ॥उदीर
तामिति क्रमेण नवर्चो जपन् ॥ उपांशु आम्नायस्वरेण पठन्नुप्रासिं
चेत् ॥ अंजलिस्थितं जलं पितृतीर्थेन तर्पणजलाधिकरणे प्रक्षिपेत् ॥
तृप्यध्वमित्युक्त्वा प्रतिपुरुषं त्रींस्त्रीन् जलांजलीन् प्रक्षिपेदित्यर्थः ॥ ॥
तथा च योगी ॥ पितृभ्यश्चाप्युप्रासिंचेत् जपन्मंत्रान् यथाक्रमं ॥ तृप्य
ध्वमिति च त्रिस्त्रिः पुरुषं प्रति तर्पयेदिति ॥ मार्जनं तर्पणं श्राद्धं न
कुर्याद्वारिधारया ॥ कुर्याच्चेद्वारिधाराभिस्तत्सर्वं निःफलं भवेत् ॥
इति वचनादत्र केचिदुदीरतामित्यादिकानामृचां पित्रादितर्पणे ज
लिदाने करणत्वमन्यंते ॥ तदत्रसमंजसं ॥ सूत्रार्थपर्यालोचनया

करणताप्रतीतेः ॥ कथं जपन्प्रासिंचेदित्यत्र प्रसूयेन मंत्रान् जपता सततं
जलप्रक्षेपः कार्य इति सूत्राप्रतीयते ॥ करणं हेतु मंत्रांतेः कर्मादिः सं
निपात्य इति परिभाषया मंत्रांते जलिः प्राप्तः ॥ तथा सति जपत्वाद्धस्य
वात्रु प्रसूयस्य त्वानर्थक्यात्प्रसंगः ॥ दानर्थता कल्पनान्त्र प्रसेकत्वाद्धु
स्यात्तस्मादिदं प्रसेकाख्यकर्मांतरं स्यात् ॥ धारानिषेधस्तु प्रसेकाति
रिक्तविषयः ॥ ॥ नमो वइत्युक्का मातामहानांन्वेवं ॥ ॥ नमोवइ
त्यस्तौ यजूंषि उक्त्वा जलमातामहादित्रयाणामपि एवं अमुना प्रकारे
ण जलं प्रक्षिपेत् ॥ योगी ॥ नमो वइति जप्त्वैव ततो मातामहानपि ॥ त
र्पयेदा शास्त्रार्थं धर्मपरममाश्रित इति ॥ अत्र यद्यपि सूत्रे स्वतामा
तृतर्पणं नोक्तं तथापि स्मृतिवाक्यात्कर्तव्यमेव ॥ तथान्व ऋषिप्रसंगः ॥

पित्रादिभ्योजलंदद्याज्जपमंत्रान्यथाविधि ॥ त्र्यब्धमितिचत्रिर्वै
ततोमातृभ्यएवचेति ॥ मरीचिः ॥ पित्रादित्रयपत्नीनांपृथक्कुदेयं
ततोजलं ॥ ततोमातामहानांचक्रमएषहितर्पणे ॥ स्मृत्यंतरात् ॥
अंतेमातामहान्कृत्वामातृणामायुःप्रयच्छति ॥ तर्पणंपिंडदानंच
नरकंसतुगच्छेति ॥ ॥ गुरुशिष्यर्त्विक्ज्ञातिबांधवान् ॥
॥ गुरुः मात्वार्यंउपनीयवेदाध्यापकं ॥ शिक्षितुयोग्यान्शुश्रि
ष्यान् ॥ पुत्रादीन् ॥ ऋत्विजोयाजकान् ॥ ज्ञातीन्पितृव्यभ्रात्रा
दिसपिंडगोत्रजान् ॥ बांधवान् ॥ मातुलमातुलेयपितृष्वस्रि
यादीन् ॥ योगी ॥ पूर्वंस्ववंशजानांतुकुर्यादुदकतर्पणं ॥ सुहृत्सं
बंधिभृत्यानांततःकुर्यात्तुतर्पणं ॥ स्मृत्यंतरात् ॥ ब्राह्मणस्त्वन्य
वर्णान्संतर्प्यतज्जातितामियात् ॥ सवर्णेभ्योजलंदद्यान्नान्ये

भ्यस्तु कदाचन ॥ कामाक्षो भाग्स्य पान्मोहाल्लबात उजाति ताभिया
त् ॥ क्षत्रियाणां प्रकुर्त्तव्यं तर्पणं तु पुरोहितैरिति ॥ तथा ॥ गोत्रं भना
मस्वधाकारैस्तर्पयेदनुपूर्वशः ॥ नामग्रहणे विशेषमाह बौधा
यनः ॥ शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु ॥ गुप्तांतं चैव
वैश्यस्य दासांतं शूद्रजन्मन इति ॥ अत्र संबंधानुकीर्त्तनमपि कुर्यात् ॥
गोत्रसंबंधनामानि पितृकर्मणि कीर्त्तयेदिति भृगुवचनात् ॥
अतर्पणे प्रत्यवायमाह ॥ ॥ अतृप्ता देहाद्रुधिरं पिबंति ॥ ॥
पूर्वोक्ता ब्रह्मादयः ॥ अतृप्ताः संतः अतर्पयितुर्देहाच्छरीराद्रुधि
रं रक्तं पिबंति शोषयंति ॥ तर्पणाकरणे प्रत्यवायेन देहाद्रक्तशोषो
भवतीत्यर्थः ॥ वसिष्ठः ॥ नास्तिक्यभावाद्यः स्वस्थो न तर्पयति
वै पितॄन् ॥ पिबंति देहनिस्रावं पितरोस्य जलार्थिनः ॥ ब्रह्मवैवर्ते ॥

त

61

देवतांश्च मुनींश्चैव पितॄन्योगेन तर्पयेत् ॥ देवादीनामृणी भूत्वा नरकं स
व्रजत्यध इति ॥ अतर्पिता देहाद्रुधिरं पिबंति ॥ तिनिदार्थवादश्रवणात्
नित्यस्नानाव्रतिलाद्यं स्नानमपि तर्पणं कुर्यादेव ॥ अत्र मरीचिः ॥ ति
लानामप्यलाभे तु सौवर्णरजतेन वा ॥ तदभावेपिसिंचेतदर्भैर्मंत्रे
णवापुनरिति ॥ ॥ वासोनिष्पीड्याचम्य ॥ ॥ वासः स्नानव[illegible]स्त्र
निष्पीडयेत्तस्माज्जलं निष्क्राम्याचामेत् ॥ योगी ॥ वस्त्रनिष्पीडनंतो
यं श्राद्धे चोच्छिष्टभोजनं ॥ भागधेयं श्रुतिप्राह तस्मान्निष्पीडये
त्स्थले ॥ जलमध्ये तु यः कश्चिद्ब्राह्मणो ज्ञानदुर्बलः ॥ निष्पीडय
तितद्वस्त्रं स्नानं तस्य वृथा भवेत् ॥ वशिष्ठोपि ॥ तीरे जलाशयस्ये
वं निरस्य पितृतर्पणं ॥ निष्पीडयेत्स्नानवस्त्रं दक्षिणाभिमुखस्थ
ले ॥ स्मृत्यंतरे विशेषः ॥ दक्षिणाभिमुखास्तिष्ठन्प्राचीनावीतवानपि ॥

62

वेष्टयन्नप सव्ये न स्नानवस्त्रं निपीडयेदिति ॥ पराशरः ॥ स्नानार्थमु
पगच्छंति देवापितृगणैस्सह ॥ वायुभूतास्तु गच्छंति तृषार्त्ताः सलि
लार्थिनः ॥ निराशास्ते निवर्त्तंते वस्त्रनिष्पीडने कृते ॥ तस्मान्नपीडयेद्व
स्त्रमकृत्वा पितृतर्पणमिति स्मृत्यंतरात् ॥ त्रिगुणीकृतवस्त्रं तु न पीडयं
तु विचक्षणैः ॥ पीडनीयं चतुष्कृत्वा तु न त्वाधो दशांबुनि ॥ प्रातर्विशेष
माह वसिष्ठः ॥ निष्पीड्य वस्त्रमाचम्य ततः संध्यामुपासते ॥ मध्या
ह्ने तर्पणात्पूर्वं वस्त्रनिष्पीडनं भवेत् ॥ अथ जलदेवतार्चनमाह ॥ ॥
ब्राह्म्यं वैष्णवं रौद्रं सावित्रं मैत्र वारुणं तल्लिंगैर्मंत्रैरर्चयेत् ॥ ॥ ब्रह्म
णोऽयं ब्राह्म्यः विष्णोरयं वैष्णवः रुद्रस्यायं रौद्रः सवितुरयं सावित्रः मित्र
स्यायं मैत्रः वरुणस्यायं वारुणः ब्राह्म्यश्च वैष्णवश्च रौद्रश्च सावित्रश्च
मैत्रश्च वारुणश्च ब्राह्म्यवैष्णवरौद्रसावित्रमैत्रवारुणास्ते ॥ कीदृशो

63



स्तल्लिंगैः तेषां ब्रह्मादीनां लिंगप्रकाशानसामर्थ्यं येषु तेन तल्लिंगास्तैस्तल्लि
गैस्तामेवार्चयेत्पूजयेत ॥ नत्वत्र तद्धिते न तल्लिंगत्वे प्राप्ते पुनस्तल्लिंगै
रित्युक्तिः स्पष्टा ॥ सत्यां श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याभिर्मं
त्राणांग विनियोगो भवति सर्वत्र ॥ अत्र लिंगमेव विनियोजकं ॥ ततः
येषां मंत्राणां तत्प्रकाशानसामर्थ्यं तत्र एवात्रगमात्या ॥ इत्यर्थं तल्लिंगै
रित्युक्तं ॥ एकैकेन तल्लिंगेन मंत्रेण पृथक्पृथक्षोडशोपचारैः पं
चोपचारैर्वा ब्रह्मादीन्पूजयेदित्यर्थः ॥ योगी ॥ ब्राह्म्येवेदम्यवरौद्रे
त्सुसावित्रैर्मंत्रवारुणैः ॥ तल्लिंगैरेव मंत्रैस्ताननर्चयेत्सुसमाहितः ॥
ध्यात्वा प्रणवमेवादौ देवानां तु यथाक्रमं ॥ नमस्कारेण पुष्पाणि वि
न्यसेत्तु पृथक्पृथक् ॥ आर्चितं स्याज्जगदिदं तेन सर्वं चराचरं ॥ स्मृ
ति सारे ॥ नैकं पुष्पं द्विधा कुर्यान्न भिंद्यात्कलिकामपि ॥ भेदश्च कलि

64

कुर्वाणां समानो ब्रह्मसूत्रया ॥ ॥पुराणात् ॥ अप्स्वग्नौ मंडले सूर्ये
स्थंडिले प्रतिमासु च ॥ षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं ॥
अग्नौ क्रियावतां देवो हृदि देवो मनीषिणां ॥ प्रतिमास्वल्पबुद्धीनां यो
गिनां हृदये हरिरिति ॥ ॥अ[illegible]ः स[illegible]सुपस्थाय प्रदक्षिणी
कृत्य दिग्भ्यो देवताभ्यश्च नमस्कृत्योपविशेत् ॥ ॥अदृश्रमस्य केत
वो हंसः शुचिषदित्येताभ्यामृग्भ्यामादित्यं सूर्यमुपस्थाय स्तुत्वा
प्रदक्षिणीकृत्य प्रदक्षिणेनावर्त्य दिशाः प्राच्यादयः देवताश्च स
ध्यानात्तासामेवाधिपतयः ॥ इंद्रादयस्तानपि मंत्रांतरानभिधा
नात् ॥ चतुर्थ्यंतैर्नाममंत्रैरेव नमस्कृत्योपविशेत् ॥ योगीश्वरः ॥
ततो वलोकूपेदर्कं हंसः शुचिषदित्यृचा ॥ सपाति ब्रह्मणः सद्मस्ता

त्वेढेभ्यो न या अपि ॥ न तस्यापो नमस्कुर्याद्दिक्पाले ऽ च देवताः ॥ अत्र
२ हर स्मरतिं सा वल्यां तु विशेषः ॥ स्वयं भूरित्सुपस्थायस्त्र्यस्येति
प्रदक्षिणं ॥ अ यस्सन्न नमस्कुर्याद्विष्णोरादिदेवता अपि ॥ ॥ ब्रह्मा
ग्निस्थविष्यो षधि वाग्वान्न स्याति विघ्नमुर्महद्ध्यो ऽ घ्नो ऽ पांपतयेव
रुणाय नमइति सर्वत्र ॥ ॥ पाठक्रमेण ब्रह्मादि उ उ दान पूर्वकं
नमेदित्यर्थः ॥ नमइति सर्वत्रानुषंगः कर्तव्यः ॥ योगयाज्ञवल्क्यः ॥
एताभ्यो देवताभ्यश्च नमस्कारं पूजने ॥ दत्वा नमस्ये क्रमेणा
स्वतैवै सर्वकर्मणा मिति ॥ ततः किं कुर्यादित्यत आह ॥ ॥ सव
सेति मुखं विमस्थ देवागानु विविदइति विसर्जयेतु ॥ ॥ संवर्त

[illegible]ति मंत्रेण ॥ अंजलिना जलमादाय मुखं आस्यं विमृष्य शोधयति ॥ मजपुसुदं ॥ तथा च स्मृतिः ॥ संवर्त्तसितिपाणिभ्यां तोयं रक्षाकंयेत्सुखमिति ॥ देवागातुविद इति मंत्रेण कर्मांगभूतां दत्वा संस्थास्मुद्रयाविसर्जयेत् स्थानं नमयेत् ॥ तथा च शिवः ॥ ॥ अधोमुखे वामहस्ते उत्तानं दक्षिणं करं ॥ क्षिप्तांगुलीरंगुलीभिः संयोज्याप्युपरिवर्त्तयेत् ॥ एवः स्नानविधिरेषः स्नानविधिः ॥ ॥ एषः पूर्वोक्तः स्नानविधिः नित्यस्नानविधिरेषः कर्त्तव्यता ॥ समाप्तिज्ञापनार्थं द्विरुक्तिः ॥ इति श्रीकर्कोपाध्यायकृतं तृतीयं कंडिकासूत्रार्थं समाप्तं ॥ ॥ सांबार्पणमस्तु ॥ छ ॥ छ ॥ छ ॥

KKSU LIBRARY
RAMTEK
441 106
M-1439
Dist Nagpur

```
[OrderDescription]
,CREATED=16.10.20 16:56
,TRANSFERRED=2020/10/16 at 17:04:53
,PAGES=67
,TYPE=STD
,NAME=S0004065
,Book Name=M-1439-TRIKANDIKA STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,
```